# Shri Bhramaramba Ashtakam 2

# શ્રીભ્રમરામ્બાષ્ટકમ્ ૨

## Document Information

Text title : Bhramaramba Ashtakam 2

File name : bhramarAMbAShTakam2.itx

Category : devii, aShTaka, otherforms, devI

Location : doc_devii

Latest update : July 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

Shri Bhramaramba Ashtakam 2

# શ્રીભ્રમરામ્બાષ્ટકમ્ ૨

શ્રીકણ્ઠાર્પિતપત્રગણ્ડયુગલાં સિંહાસનાધ્યાસિનીં
    લોકાનુગ્રહકારિણીં ગુણવતીં લોકેક્ષણાં શાઙ્કુરીમ્ ।
પાકાલ પ્રમુખામુરાર્ચિતપદાં મત્તેભકુમ્ભસ્તનં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૧॥

વિન્ધ્યાદીન્દ્રગૃહાન્તરેનિવસિતાં વેદાન્તવેદ્યાં નિધિં
    મન્દારદ્રુમપુષ્પવાસિતકુચાં માયામ્મહામાયિનીમ્ ।
બન્ધૂકપ્રસવોજ્જ્વલારુણરખાં પઞ્ચાક્ષરીરૂપિણીં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૨॥

મ્યાચ્છુમ્ભનિશુમ્ભમેઘપટલપ્રધ્વંસ ઝઞ્ઝાનિલાં
    કૌમારીમ્મહિષાખ્ય શુષ્કવિટપી ધૂમોરુદાવાનલામ્ ।
ચક્રાદ્યાયુધસઙ્ગ્રહોજ્જ્વલકરાઞ્ચામુણ્ડિકાધીશ્વરીં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૨॥

દૃક્ચન્ત વિલાસલલ્પિત સરોજાતોરુ શોભાન્વિતાં
    નક્ષત્રેશ્વર શેખર પ્રિયતમાં દેવીં જગન્મોહિનીમ્ ।
રેઞ્જર્મઙ્ગલ દાયિનીં શુભકરીં રાજત્સ્વરૂપોજ્જ્વલાં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૩॥

કેલીમન્દિર રાજતાચલતલાં સમ્પૂર્ણ ચન્દ્રાનનાં
    યોગિઞ્છૈરુતપાદપઞ્જયુગાં રત્નામ્બરાલઙ્કૃતામ્ ।
સ્વર્ગાવાસ સરોજપત્ર નયનાભીષ્ટપ્રદાં નિર્મલાં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૪॥

સંસારાર્ણવ તારકાં ભગવતીં દારિદ્ય વિધ્વંસિનીં
    સન્ધ્યાતાણ્ડવ કેલિકાં પ્રિયસતીં સદ્ભક્ત કામપ્રદામ્ ।
ૐ જન્નૂપુરપાદપઙ્કજયુગાં બિમ્બાધરાં શ્યામલાં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૫॥

ચઞ્ચત્કાઞ્ચન રત્નચારુ કટકાં સર્વંસહાવલ્લભાં
    કાઞ્ચી કાઞ્ચન ઘણ્ટિકા ઘણઘણં કઞ્ચિત પતેક્ષણમ્ ।
આર્તત્રાણપરાયં પુરહરપ્રાણેશ્વરીં શામ્ભવીં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૬॥

સ્વર્ણોકેશ્વરવન્દ્ય પાદકમલાં પઙ્કેરુહાક્ષસુતાં
    પ્રાલેયાચલવંશપાવનકરીંશ ृઙ્ગારભૂષાનિધિમ્ ।
તત્ત્વાતીત મહાપ્રભાં વિજયિનીં દાક્ષાયિણીં ભૈરવીં
    શ્રીશૈલ ભ્રમરામ્બિકાં ભજ મનઃ શ્રીશારદાસેવિતામ્ ॥ ૭॥

ભ્રમરામ્બા મહાદેવ્યાષ્ટકં સર્વસિદ્ધિદમ્ ।
નરાણાં સર્વશત્રૂણાં ધ્વંસનં તદ્વદામ્યહમ્ ॥ ૮॥

ઇતિ શ્રીદૂર્વાસવિરચિતં શ્રીભ્રમરામ્બાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Bhramaramba Ashtakam 2*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*